Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 4 | ISSN : 2582-0095

# काशीखण्डे दण्डपाणेः उत्पत्ति कथा

**R V Venkata Ramana Simha**
Research Scholar, Vikrama Simhapuri University

**Article Info**
Volume 6, Issue 4
Page Number : 11-13
**Publication Issue :**
July-August-2023
**Article History**
Accepted : 01 July 2023
Published : 15 July 2023

**शोधसारांशः**– दण्डपाणेः आलयः अज्ञातः वर्तते। किन्तु भैरवस्य आलयः प्रसिद्ध एव। भैरवालयस्य वामभागे नाति दूरे अल्पप्रमाणः दण्डपाणेः स्थानिकान् पृष्ट्वा दण्डपाणिं दृष्ट्वा यात्रिकाः सफलाः भवन्तु।

**मुख्यशब्दः**– काशीखण्डे, दण्डपाणेः, उत्पत्ति, कथा

मनसः शान्तये शुद्धये च तीर्थयात्रा उपयुज्यते। यत्र क्षेत्रं, तीर्थं, दैवं इति त्रितयस्य समागमो भवति तत्र प्रयोजनाधिक्यं भवतीति आस्तिकाः तादृशं क्षेत्रं सेवितुमिच्छन्ति। पूर्वं यैः कैरपि प्रसिद्धैः सेवितं इति श्रुतं चेत् तत्र विशेष गौरवं दर्शयन्ति। तच्च केवलं माहत्म्यं अर्थवादमात्रं माभूदिति भक्तेषु पुराणानि तत्तत् क्षेत्र सेवकानां महात्मनां चरितं वर्णयन्ती। काशी क्षेत्रे विश्वेश्वरः दैवं, क्षेत्रं प्रलये अपि न नष्टं, गङ्गा तीर्थमिति त्रितयस्य समागमः वर्तते।

काशीक्षेत्रे मोक्षप्रदायकेषु भैरवः विश्वेश्वरस्य सेवकोऽपि भक्तैः सेव्यः। कालभैरव दर्शनेन काशीयात्रा समग्रफला भविष्यति।

**विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्।**

**वन्दे काशीगुहां गङ्गां भवानी मणिकर्णिकाम्।। - कशीखण्डः(पीठिका) भागः-1**

इति काशीयात्रा काले पठ्यते एतेषां षण्णां दर्शनेन यात्रा सम्पूर्णा भवति। तेषु भैरवोत्पत्ति कथा काशीखण्डे एवं वर्णिता।

स्कन्दः दण्डपाणेः कथां एवं उक्तवान्। पुरा रत्न भद्रः इति प्रसिद्धः यक्षः अनेकान् भोगान् भुक्तत्वापि अनपत्योऽभूत्। शिवानुग्रहेण चिरात् पूर्णभद्रनामकः तस्य सुतः उत्पन्नः। पूर्णभद्रोऽपि सर्वसम्पन्नवानपि चिरं अनपसोऽभूत्। पूर्णभद्रस्य भार्या कनककुण्डला। साऽपि अनपत्यदुःखेन पीडिता। तौ दम्पती सन्तानप्राप्तये शिवः सेव्यः इति निश्चयं चक्रतुः। कनककुण्डला भर्तारं तदर्थे बहुधा चोदयामास। सः काशीं प्राप्यनादोपासन विधानेन शिवं स्तुवन् बहुतिथं कालं तपश्चचार। शिवप्रसादेन तौ दम्पती हरिकेशनामकं पुत्रं प्रापतुः।

हरिकेशः जन्मनः प्रभृति भोगविरक्तः शिवध्यानतत्पर एवा भूत्। एवं भोगविमुखं विद्याविमुखं उन्मत्तवत् चरन्तं पुत्रं दृष्ट्वा पिता बहुधा तं तर्जयामास। हरिकेशं च गृहात् निष्कासयामास। गृहात् निष्कासितस्य हरिकेशस्य चिन्ता अत्राऽध्याये विस्तरेण वर्णिता। एवं चिन्तयानः नान्या गतिः अस्ति इति निश्चित्य हरिकेशः वाराणसीं गतवान्। तत्र विस्तरेण वाराणसी वर्णनं वर्तते। वाराणसीं प्रविष्टः हरिकेशः शिवमेव गायन् उन्मत्तवत् चरति स्म।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अत्रान्तरे पार्वतीपरमेश्वरौ नगरे विहारं चक्रतुः। तयोः संभाषणे काश्याः महिमा विस्तरेण वर्णिता शिवौ हरिकेशं ददृशतुः। हरिकेशे दयमाना पार्वती अयं परेण अनुग्राह्यः इति भर्तारं चोदयामास। शिवः पार्वतीद्विदीयः तस्मै दर्शनं अनुगृहीतवान्। शिवोऽपि हरिकेशस्य स्तोत्रेण प्रीतः तमेवं अनुजग्राह। मम क्षेत्रस्य त्वं रक्षको भव दुरात्मनां दण्डपिता त्वं दण्डपाणि नाम्ना भविष्यसि मम सारुप्यं च ते भविष्यति। त्वमेव काशिवासिनां अन्नप्रदाता ज्ञानदाता प्राणदाता मोक्षदाता च भविष्यसि त्वं बहुभिः विघ्नैः भक्तं परीक्ष्य उत्तीर्णाय मोक्षं दास्यसि। त्वां अनाराध्य ममार्चां कुर्वन्नपि भक्तः सफलो न भविष्यति इति आदिश्य काशीरक्षायां नियुक्तवान् ।

**[1] क्षेत्रस्य यक्षात्य मम प्रियस्य भो**
**भवाऽधुना दण्डधरो वरान्मम।**
**स्थिरस्त्वमद्यादि दुरात्मदण्डकः**
**सुपालकः पुण्यकृतां च मत्प्रियः॥**
**त्वं दण्डपाणिर्भव नामतोऽधुना**
**सर्वान् गणान् शाधि ममाज्ञयोत्कटान्।**
**गणाविमौ त्वामनुयायिनौ सदा**
**नाम्ना यथार्थौ नृषु संभ्रमोद्भ्रमौ॥**
**[2] त्वतसाकृते क्षेत्रवरे हि यक्षराट्**
**कस्त्वामनाराध्य विमुक्तिभाजनम्।**
**सभाजनं पूर्वत एव ते चरे-**
**ततः समर्चां मम भक्त आचरेत्॥**
**त्वं दक्षिणस्यां दिशि दण्डपाणे**
**सदैव मे नेत्रसमक्षमत्र।**
**त्वं दण्डयन् प्राणभृतो दुरीहा-**
**निहास्व नृन् स्वनाभयं दिशन्वै॥**

ततः दण्डपाणेः अष्टकं अगस्त्येन गीतं अध्यायान्ते वर्तते।

त्रयः त्रिंशोऽध्याये ज्ञानवापीतीर्थस्य माहात्म्यं वर्तते। ईशान्यदिशः पालकः ईशानः कदाचित् महेश्वरं सेवितुं काशी आजगाम। अयमीशानः शिवाकृतिः शिव स नामा अपि महादेवात् भिन्नः ततो न्यूनश्च। केवलमयं एकस्याः विदिशः पालकः। एवं भगवत् सेवार्थं आगतः ईशानः परमेश्वरं दृष्टा तवाभिषेकेनतोषयिष्यामि इति कृतनिश्चयः शूलेन दक्षिणस्यां दिशि कुण्डमेकं विचखान्। तत् कुण्डजलेन भगवन्तं अभिषिषेचः। एवं घठसहस्रेण सहस्रकृत्व शिवाभिषेकं कृतवान्। ततः प्रीतः परमेश्वरः “वरं दास्यामि” इति तमवोचत्। ईशानोऽपि त्वं यदि प्रीतोऽसि तवैव नाम्ना तीर्थोऽयं प्रसिद्धो भवतु इत्यवदत्। ततः तत् तीर्थं शिवतीर्थमिति प्रथमं प्रसिद्धम्।

[3] **त्रिलोक्यां यानि तीर्थानि भूर्भुवः स्वः स्थितान्यपि ।**
**तेभ्योऽखिलेभ्यस्तीर्थेभ्यः शिवतीर्थमिदं परम् ॥**
**शिवज्ञानमिति ब्रूयुः शिवशब्दार्थचिन्तकाः।**
**तच्च ज्ञानं द्रवीभूतमिह मे महिमोदयात् ॥**

इदानीं दण्डपाणेः आलयः अज्ञातः वर्तते। किन्तु भैरवस्य आलयः प्रसिद्ध एव। भैरवालयस्य वामभागे नाति दूरे अल्पप्रमाणः दण्डपाणेः स्थानिकान् पृष्ट्वा दण्डपाणिं दृष्ट्वा यात्रिकाः सफलाः भवन्तु।

**पादटिप्पणि**

1. का.ख – 32 अ – 151,152 श्लो
2. का.ख – 32 अ – 157,162 श्लो.
3. का.ख – 33 अ – 31,32 श्लो.

**सन्दर्भग्रन्थसूचिः**

1. काशीखण्डः
2. स्कन्दपुराणम्